हारः। वृद्धोऽशीतिकावरः वृद्धग्रहणं वचननिषिद्धानामन्येषामपि श्रोत्रियादीनामुपलक्षणम्। कितवोऽक्षदेवी। मत्तः पानादिना, उन्मत्तो ग्रहाविष्टः। अभिशस्तः, अभियुक्तो ब्रह्महत्यादिना। रङ्गावतारी चारणः पाषण्डिनो निर्ग्रन्थिप्रभृतयः। कूटकृत् कपटलेख्यादिकारी विकलेन्द्रियः श्रोत्रादिरहितः पतितः ब्रह्महादिः। आप्तः सुहृत्, अर्थसम्बन्धी विप्रतिपद्यमानार्थसम्बन्धी। सहाय एककार्य्यः रिपुः शत्रुः तस्करः स्तेनः साहसी स्वबलावष्टम्भकारी दृष्टदोषो दृष्टवितथवचनः। निर्धूतो बन्धुभिस्त्यक्तः। आदिशब्दादन्येषामपि स्मृत्यन्तरोक्तानां दोषादसाक्षिणाम्भेदादसाक्षिणां स्वयमुक्तेर्म्मृतान्तरस्य च ग्रहणम्। एते स्त्रीबालादयः साक्षिणो न भवन्ति" मिता०। अत्रापवादः "सर्व्वः साक्षी संग्रहणे चौर्य्ये पारुष्यसाहसे"। या० स्मृ० संग्रहणादौ सर्व्वे वचननिषिद्धाः श्रोत्रियादयः तपःप्रभृति गुणरहिताश्च साक्षिणोभवन्ति। दोषादसाक्षिणो भेदादसाक्षिणः स्वयमुक्तिश्चात्रापि साक्षिणो न भवन्ति सत्याभावादिहेतोस्तेषु विद्यमानत्वादिति" मिता०।

**असाधन** न० अभावे न०त०। १सम्पादनाभावे साधनं हेतुः न०त०। २अकारणे न० ब०। ३कारणशून्ये।

**असाधारण** त्रि०साधारणं सामान्यधर्मयुक्तं न०त०। १तद्भिन्ने, तन्मात्रवृत्तिधर्मयुक्ते विशेषे २अधिके च। न्यायमते "यस्तूभयस्माद्व्यावृत्तः स त्वसाधारणो मत" इत्युक्ते ३सपक्षविपक्षावृत्तौ हेतौ पु०। यथा वह्निसाधने गगनादिहेतुः स च पक्षे पर्व्वतादौ, पक्षभिन्ने जलादौ च न विद्यते गगनादेः कुत्रापि विद्यमानत्वाभावात् इति तस्य तथात्वम् "साधारणासाधारणयोर्मध्येऽसाधारणे कार्य्यसंप्रत्यय" इति न्यायः। ४स्वमात्रस्वत्वास्पदीभूते इतरस्वत्वरहिते धनादौ च। स्त्रियां ङीष् गौरा०। "पिता पुत्रान्तरेष्वपि साधारणः माता त्वसधारणी" मिता०।

**असाधारणानैकान्तिक** पु० कर्म०। न्यायोक्ते सर्व्वसपक्षव्यावृत्ते हेत्वाभासभेदे यथा शब्दोनित्यः शब्दत्वात् अत्र शब्दत्वं सर्व्वनित्येभ्यो व्यावृत्तं शब्दमात्रवृत्तिरिति तस्य तथात्वम्।

**असाधु** त्रि० न०त०। १साधुभिन्ने, २असच्चरिते, ३दुष्टे "अतोऽर्हसि क्षन्तुमसाधु साधु वा" किरा ४संस्कृतशब्दभिन्ने, अपभ्रंशादौ च। "असाधुरनुमानेन" "असाधूनां प्रयोगे तु प्रत्यवायोऽपि नो तथा इति" च हरिः। स्त्रियां ङीप्। असाध्वी भारती असाध्वी योषित् इत्यादि।

**असाध्य** त्रि० साधयितुमशक्यः। १साधयितुमशक्ये रिपौ रोगादौ च "असाध्यं कुरुते कोपं प्राप्ते काले गदो यथा" माघः। असाध्यरोगाश्च सुश्रुते उक्ताः ते च अवारणीयशब्दे ४४८ पृष्ठे दर्शिताः "जङ्घं साध्यमशोयाप्यमसाध्यं युगपद्गत" मित्यादयोऽपि विशेषतोऽसाध्या वैद्यके उक्ताः ततएव ते वेदितव्याः। [समर्थे

**असान्तापिक** त्रि० सन्तापाय न प्रभवति ठञ्। सन्तापाया-

**असान्द्र** त्रि० विरोधे न०त०। अनिविड़े विरले।

**असामञ्जस्य** न०अभावे न०त०। १सामञ्जस्याभावे २अयुक्तत्वे ३सन्निवेशासम्भवे च न०ब० तच्छून्ये त्रि०।

**असामर्थ्य** न० अभावे न०न०। सामर्थ्याभावे अपाटवे। "कालदोषादसामर्थ्यात् सर्व्वं तत् सफलं स्मृतम्" "असामर्थ्यात् शरीरस्य कालशक्त्याद्यपेक्षया। मन्त्रस्नानादितः सप्त केचिदिच्छन्ति सूरयः" योगिया०।

**असामयिक** त्रि० समयोऽस्य प्राप्तः ठञ् न०त०। अप्राप्तकाले "किमसामयिकं वितन्वता मनसः क्षोभमुपात्तरंहसः" किरा०।

**असामान्य** त्रि० नास्ति सामान्यं तुल्यता यस्य। अनुपमे। अभावे न०त०। तुल्यत्वाभावे त्रि०। असाम्यमप्यत्र।

**असाम्प्रतम्** अव्य० न साम्प्रतम् युक्तं न०त०। अयुक्ते। "विषवृक्षोऽपि संवर्द्ध्य स्वयं छेत्तुमसाम्प्रतम्" कुमा० "सम्प्रत्यसाम्प्रतं वक्तुमुक्ते मुषलपाणिना" माघः "अविधाय विवाहसत्क्रियामनयोर्गम्यत इत्यसाम्प्रतम्" रघुः।

**असार** पु० न०नास्ति १सारो यस्य। सारहीने एरण्डे वृक्षभेदे। २निस्सारे त्रि०। "असारः खलु संसारः" इत्युद्भटः। "निदर्शनमसाराणां लघुर्बहुतृणं नरः" माघः "धिगिमां देहभृतामसारताम्" रघुः। ४अगुरुचन्दने न० राजनि०। न०त०। ३सारभिन्ने तुच्छत्वे पु०।

**असावधान** त्रि० न०त०। अवधानहीने प्रमत्ते।

**असाहाय्य** न० अभावे न०त०। १साहाय्याभावे। न०ब०। २साहाय्यशून्ये त्रि०।

**असि** अव्य०अस-दीप्तौ इन् विभक्ति प्रतिरूपकम्। त्वमित्यर्थे "कृतवानसि विप्रियं न मे" कुमा० "धन्यासि वैदर्भि! गुणैरुदारैः" नैष०। "शूरोऽसि कृतविद्योऽसि दर्शनीयोऽसि पुत्रक! इति नीतिः।

**असि** पुंस्त्री०अस्यति सेवनेन पापानि इन् वा ङीप्। वारणसीदक्षिणस्थे १नदीभेदे वाराणसीशब्दे विवृतिः। अस्यते क्षिप्यते